
DSSSB TGT & PGT
Part-B
SCHOLAR BATCH
संस्कृत
अलंकार
Part -3
LIVE
12-07-2024 05:00 PM

## 2. अनुप्रासः

लक्षण-वर्णसाम्यमनुप्रासश्छेकवृत्तिगतो द्विधा ।
सोऽनेकस्य सकृत्पूर्वः एकस्याप्यसकृत्परः ॥

-अनुप्रास २ प्रकार का होता है

1. छेकानुप्रास
2. वृत्त्यनुप्रास

# 1. छेकानुप्रास

## उदाहरणम् -

ततोऽरुणपरिस्पन्दिमन्दीकृतवपुः शशी ।
दधे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥

## 2. वृत्त्यनुप्रास

वृत्त्यनुप्रास में वृत्ति 3 प्रकार की होती है –

१. उपनागरिका - माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।

यथा –

अनङ्गरङ्गप्रतिमं तदङ्ग
भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः
स्वान्तानि शान्तापरचिन्तनानि ॥

## २. परुषा - ओजः प्रकाशकैस्तैस्तु परुषा

यथा -

मूर्जामुद्धृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां
किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः ॥

## ३. कोमला (ग्राम्या) - कोमला परैः

यथा- अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि ! मृणालैरिति वदति दिवानिशं बाला ।।

केषांचिदेता वैदर्भीप्रमुखा रीतयो मताः

# लाटानुप्रास

शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥

## 1- पदानाम् -

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य

## 2-पदस्य

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥

3-समासे (वृत्तौ) - एक ही समास में शब्द की आवृत्ति

4- अन्यत्र - दो पृथक् समासों में शब्द की आवृत्ति

5- वृत्यवृत्योः - समास तथा असमान में एक ही शब्द की आवृत्ति

सितकरकररुचिरविभा विभाकराकार ! धरणिधर ! कीर्तिः ।

पौरुषकमला कमला साऽपि तवैवास्ति नान्यस्य ।।

1. अनुप्रासः कीदृशः अलङ्कारः

A. शब्दालङ्कारः

B. अर्थालङ्कारः

C. उभयालङ्कारः

D. दोषालङ्कारः

2. अनुप्रासः मुख्यतया कतिविधो भवति काव्यप्रकाशानुसारम् ?

A. त्रिविधः

B. द्विविधः

C.चतुर्विधः

D. पञ्चविधः

3. वृत्यनुप्रासे कतिविधा: वृत्तय: भवन्ति ?

A. त्रिविधा:

B. चतुर्विधा:

C. पञ्चविधा:

D. षड्विधा:

4. लाटानुप्रासः कतिविधः?

A. त्रिविधः

B. चतुर्विधः

C. पञ्चविधः

D. षड्विधः

5. वर्णानुप्रासस्य भेदः भवति ।

A. वृत्त्यनुप्रासः

B. छेकानुप्रासः

C. उपर्युक्तौ द्वावपि

D. लाटानुप्रासः

6. पदानामनुप्रासः भवति ।

A. छेकानुप्रासः

B. लाटानुप्रासः

C. वृत्त्यनुप्रासः

D. सर्वे

7. अनुप्रासालङ्कारः काव्यप्रकाशे निरूपितः

A. सप्तमे उल्लासे

B. अष्टमे उल्लासे

C. नवमे उल्लासे

D. दशमे उल्लासे

8. वर्णसाम्यमिति कस्यालङ्कारस्य लक्षणम् ।

A. श्लेषस्य

B. स्वभावोक्तेः

C. अनुप्रासस्य

D. अपह्नुतेः

9. "सोऽनेकस्य सकृत्" कस्यालङ्कारस्य लक्षणम् इदम्।

A. श्लेषस्य

B. छेकानुप्रासस्य

C. वृत्त्यनुप्रासस्य

D. लाटानुप्रासस्य

10. "एकस्याप्यसकृत्परः" कस्यालङ्कारस्य लक्षणम् इदम् ।

A. श्लेषस्य

B. छेकानुप्रासस्य

C. वृत्त्यनुप्रासस्य

D. लाटानुप्रासस्य

11. "ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी। दधे कामपरिक्षामकामिनीगण्डपाण्डुताम्" इत्यत्र अलङ्कारो भवति।

A. वृत्त्यनुप्रासः

B. छेकानुप्रासः

C. लाटानुप्रासः

D. स्वभावोक्तिः

12. "अनङ्गारङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गी- कृतमानताङ्ग्याः" इत्यत्र अलङ्कारो भवति ।

A. वृत्त्यनुप्रासः

B. छेकानुप्रासः

C. लाटानुप्रासः

D. स्वभावोक्तिः

13. "अपसारय घनसारं कुरु हारं दूर एव किं कमलैः" इत्यत्र अलङ्कारो भवति ।

A. वृत्त्यनुप्रासः

B. छेकानुप्रासः

C. लाटानुप्रासः

D. स्वभावोक्तिः

## लक्षणम्

**अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।**
**यमकम् पादतद्भागवृत्ति तद्यात्यनेकताम् ॥**

**समरसमरसो**ऽयमित्यादावेकेषामर्थवत्त्वे अन्येषामनर्थकत्वे भिन्नार्थानामिति न युज्यते वक्तुमिति अर्थ सतीत्युक्तम् । सेति सरो रस इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थिता ।

**यमक के मुख्य दो भेद होते हैं -**

**1. पादवृत्ति** **2. पादांशवृत्ति**

1. यमकः कीदृशः अलङ्कारः

A. शब्दालङ्कारः

B. अर्थालङ्कारः

C. उभयालङ्कारः

D. दोषालङ्कारः

2. यमकालङ्कारः काव्यप्रकाशे निरूपितः

A. सप्तमे उल्लासे

B. अष्टमे उल्लासे

C. नवमे उल्लासे

D. दशमे उल्लासे

3. अर्थ सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः कस्यालङ्कारस्य लक्षणम् ।

A. अर्थान्तरन्यासस्य

B. दृष्टान्तस्य

C. अनुप्रासस्य

D. यमकस्य

4. "सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्वं पृथिवीं जय ॥" इत्यत्र अलङ्कारो भवति ।

A. अर्थान्तरन्यासः

B. दृष्टान्तः

C. उभयम्

D. यमकम्

# श्लेष

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥

श्लेष के 8 भेद हैं –

1. वर्णश्लेष
2. पदश्लेष
3. लिङ्गश्लेष
4. भाषाश्लेष
5. प्रकृतिश्लेष
6. प्रत्ययश्लेष
7. विभक्तिश्लेष
8. वचनश्लेष

# उपमालङ्कारः

## सामान्य परिचय

- साधर्म्यमुपमा भेदे - जहां पर उपमान और उपमेय में भेद होने पर भी उन में कुछ साधर्म्य (समानता) कही जाती है वह उपमा कहलाती है। (काव्यप्रकाशः)

- उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः (जहां पर दोनों उपमान और उपमेय की सादृश्य की शोभा दिखाई जाये वह उपमा है। (कुवलयानन्द)

## उपमालङ्कार

**पूर्णोपमा** — **लुप्तोपमा**

**1. पूर्णोपमा -** जिस उपमा में 1. उपमान, 2. उपमेय, 3. उपमावाचकशब्द, 4. साधारणधर्म चारों का शब्द से समावेश हो।

पूर्णोपमा ६ प्रकार की होती है।

**जैसे -** तव मुखं चन्द्र इव सुन्दरम् ।

**उपमान -** कोई प्रसिद्ध पदार्थ जिससे तुलना की जाती है। जैसे- चन्द्र ।

**उपमेय -** जिसकी तुलना की जाती है। जैसे मुख ।

**वाचकशब्द** - इव, यथा, तुल्य, सदृश, सम इत्यादि । जैसे - इव ।

**साधारणधर्म -** जो उपमान और उपमेय दोनों में हो। जैसे सुन्दरता ।

**2. लुप्तोपमा -** जहां उपर्युक्त चारों में में से कोई एक दो या तीन अंगों का लोप होने पर भी सादृश्य प्रतीत होता हो। लुप्तोपमा 19 प्रकार की होती है